College Name: Ramsaday College

Department : Sanskrit

Semester : II (General)

Paper : CC-A2/GE-2

Topic : Śivarājavijaya
(Unit-I, Para → 1-20)
[Objective Type Question+Answer session]

Prepared by : Paramita Banik

Content Type : Pdf

Scanned by CamScanner

शिवराजविजयः (Unit-I) [Para→1-20]

अधःस्थिताः प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः।

१. शिवराजविजयस्य रचयिता कः? शिवराजविजयो गद्यकाव्यं पद्यकाव्यं वा?

उत्तरम् शिवराजविजयस्य रचयिता श्रीमद् अम्बिकादत्तव्यासः।
☑ शिवराजविजयो हि गद्यकाव्यम्।

२. शिवराजविजयस्य प्रथमनिश्वासस्य मङ्गलश्लोकौ कुतः गृहीतौ? अस्य प्रथममङ्गलश्लोकांशे कस्य स्तुतिरस्ति?

उत्तरम् शिवराजविजयस्य प्रथमनिश्वासस्य मङ्गलश्लोकौ भागवतपुराणात् गृहीतौ।
☑ अस्य ग्रन्थस्य प्रथममङ्गलश्लोकांशे विष्णोः स्तुतिरस्ति।

३. शिवराजविजयस्य सूचनायां कस्य वर्णना अस्ति? मरीचिमाली कः?

उत्तरम् शिवराजविजयस्य सूचनायां सूर्यस्य वर्णना अस्ति।
☑ मरीचिमाली भगवतः सूर्यस्य अपरं नाम।

४. "अहो! चिररात्राय सुप्तोऽहम् ....." – अत्र वक्ता कः? तस्य वयः कियत्?

उत्तरम् "अहो! चिररात्राय सुप्तोऽहम् ....." – अत्र वक्ता ब्रह्मचारिगौरबटुः।
☑ स वयसा षोडशवर्षदेशीयः।

५. "अलं भो अलम्! मयैव पूर्वमवचिततानि कुसुमानि ....." – कः कम् इत्युक्तवान्?

उत्तरम् अलं भो अलम्! मयैव पूर्वमवचिततानि कुसुमानि - इति ब्रह्मचारिश्यामबटुः ब्रह्मचारिगौरबटुम् उक्तवान्।

Scanned by CamScanner

६. पर्वतखण्डः कुत्र आसीत् ? पर्वतकन्दरे कः विद्यते स्म ?

उत्तरम् ब्रह्मचारिणः कुटीरस्य दक्षिणस्यां दिशि पर्वतखण्डः आसीत् ।

☑ पर्वतकन्दरे एकः समाधिस्थो महामुनिः विद्यते स्म ।

७. समाधिस्थमहामुनेः विषये जनानां कीदृशो विश्वासः आसीत् ?

उत्तरम् समाधिस्थमहामुनिं केचन कपिल इति, केचन लोमश इति, केचन जैगीषव्य इति अपरे च मार्कण्डेय इति विश्वसन्ति स्म ।

८. योगिराजमुनिः प्रथमतः कस्य समये समाधिमाकलय्य कस्य समये उत्थितवान् ?

उत्तरम् योगिराजमुनिः प्रथमतः युधिष्ठिरसमये समाधिमाकलय्य वैक्रमसमये उत्थितवान् ।

९. योगिराजमुनिः कस्य समये द्वितीयवारस्य कृते समाधिमाकलय्य कस्य समये उत्थितवान् ?

उत्तरम् योगिराजमुनिः वैक्रमसमये द्वितीयवारस्य कृते समाधिमाकलय्य दुराचारयवनसमये उत्थितवान् ।

१०. शिवराजविजयस्य नायकः कः ? क वास्य प्रतिनायकः ?

उत्तरम् शिवराजविजयस्य नायकः आसीत् शिववीरः प्रतिनायकः च अवरङ्गजीवः ।

११. पाठ्यांशे 'चन्दनचर्चितभालः' - पदेन कः बोध्यते ? सुगन्धपटलैरुन्निद्रयन्निव - इत्यत्र सन्धिविच्छेदः कार्यः ।

उत्तरम् पाठ्यांशे चन्दनचर्चितभाल इति पदेन श्यामबटुः अवबुध्यते ।

☑ सुगन्धपटलैरुन्निद्रयन्निव = सुगन्धपटलैः + उन्निद्रयन् + इव ।

१२. व्युत्पत्तिनिर्देशाः करणीयाः

क) गत्वा ⇒ √गम् + क्त्वाच् ; ख) प्रणम्य ⇒ प्र- √नम् + ल्यप्

ग) कर्तुम् ⇒ √कृ + तुमुन् ; घ) प्रबुद्ध ⇒ प्र- √बुध् + क्त

Scanned by CamScanner

२३. गौरबटोः आकृतिवर्णनं कार्यम्।

उत्तरम् गौरबटुः आकृत्या सुन्दरः, जटाभिः ब्रह्मचारी, स वयसा षोडशवर्षीयः; कण्ठः तस्य कम्बुरिव; अपि च स प्रशस्तललाटः, शोभनभ्रूजो विशाललोचनयुक्त चासीत्।

२४. योगिराजस्य आकारः कीदृग् आसीत्?

उत्तरम् सुघटितं शरीरम्, सान्द्रा जटा, विशालानि अङ्गानि, अङ्गारप्रतिमे नयने, गम्भीरा मधुरा च वाणी आसीत् योगिराजस्य।

२६. आश्रमवासिभिः कस्याः क्रन्दनं श्रुतम्? कथं सा अरोदत्?

उत्तरम् आश्रमवासिभिः सप्तवर्षीयायाः एकस्याः बालिकायाः क्रन्दनं श्रुतम्। सा यावनत्रासेन अरोदत्।

—

Scanned by CamScanner